**PAPER - 5**

# MT

**2018 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - V**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

---

**प्रथमः विभागः - गद्यम् ।**

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

सूर्यखगः अर्जुनं वृक्षशाखां छेत्तुं निषेधयति यतः ........... ।

(नीडे तस्य शावकाः सुप्ताः । / सः वृक्षः विषयुक्तः आसीत् ।)

(ii) वक्त्रा सह संवादमेलनम् । १

| 'अ' | 'ब' |
|---|---|
| १) पिपीलिकाः | न पीडयामि त्वां तव शावकान् वा । |
| २) अर्जुनः | निबद्धे नीडे मम शावकाः सुप्ताः । |
| | आपत्काले त्वां ध्रुवं साहाय्यं करिष्यामः । |

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

अर्जुनः क्रूरहृदयः आसीत् ।

एकदा श्रेष्ठो धनुर्धारी अर्जुनः विहारार्थं निबिडारण्यं जगाम । जनसमाकुलान्नगराद् दूरं गत्वा सः मनःशान्तिमनुभवितुमैच्छत् । वने विहरन् चण्डातपेन तप्तः सः वीजनार्थं वृक्षशाखां छेत्तुं प्रारेभे । तदैव कोऽपि सूर्यखगः तत्रागत्य तस्य हस्ते उपविश्य तं प्रार्थयामास - ''हे धनुर्धर, न छेत्तव्या शाखासौ यतः शाखायामस्यां निबद्धे नीडे मम शावकाः सुप्ताः। महता कष्टेन निर्मितमेतन्नीडं मया । मामनुग्रहीतुमर्हति भवान् ।'' तस्य वचनं श्रुत्वा करुणार्द्रहृदयः अर्जुनः तमुवाच, ''मा कातरो भव । न पीडयामि त्वां तव शावकान् वा ।'' ततः अपरस्य वृक्षस्य शाखां छेत्तुं प्रवृतस्य अर्जुनस्य हस्तस्योपरि काश्चन पिपीलिकाः वृक्षादपतन् । ता अपि अर्जुनं प्रार्थयन्त, ''हे स्वामिन्, एतासु शाखासु पर्णबद्धाः कन्दुकाकाराः अस्माकं निलयाः । तदाश्रिताः अस्माकं शावकाः अस्माकं राज्ञी सेवकाश्च । किं बहुना, शाखाच्छेदनेन वयं सर्वे निराश्रयाः भवेम । अस्मान् उपकरोतु भवान् । आपत्काले त्वां ध्रुवं साहाय्यं करिष्यामः ।'' पिपीलिकानामभ्यर्थनामाकर्ण्य अर्जुनस्तस्मात् स्थानात् प्रातिष्ठताचिन्तयच्च, ''क्षुद्राः जन्तवः एते सूर्यखगाः पिपीलिकाः । कथं मम साहाय्यकारिणः भविष्यन्ति । अहं तु शक्तिमान्, शस्त्रधारी, निपुणयोद्धा च ।''

**२. स्वमतप्रकटनम् ।** २

मानवजीवने प्राणिनां साहाय्यं कथं भवति इति माध्यमभाषया लिखत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

नागार्जुनः द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् यतः ........... ।

(नागार्जुनः तस्य सेवाभावम् अजानात् / तस्य समीपे प्रभूतं धनम् आसीत्)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

सेवाभावः कीदृशः वर्तते ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

चिकित्सकस्य कृते सेवाभावः न आवश्यकः ।

अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, ''महाशय, अहं रसायनं कृत्वा आनीतवान् । पश्यतु भवानिति ।'' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, ''कथमिदानीम् अभाषमाणः तिष्ठसि ? किं त्वया नानीतं रसायनम्?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, ''आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान् । अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति ।'' तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । 'येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम् ?' इति राज्ञा पृष्टे नागार्जुनोऽभणत्, ''एतेन रोगिणः सेवा कृता, मानवता दर्शिता । सेवाभावेन विना कथं चिकित्सको भवेत् ? अतः अस्यैव नियुक्तिः मया कृता ।'' सेवाभावः परमगहनोऽतः स एव परीक्षणीयः इति यत् कथ्यते तद्यथार्थमेव ।

**२. पृथक्करणम् ।** २

**स्तम्भपूरणं कुरुत ।**

| प्रथमः युवकः | द्वितीयः युवकः |
|---|---|
| ........<br>........ | ........<br>........ |

(रसायनं निर्मितवान्, केवलं रुग्णं दृष्टवान्, रुग्णालयं नीतवान्, रसायनं न निर्मितवान्)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) प्रयासः, प्रकारः, प्रयत्नः ।

२) आयोजिता, समायोजिता, विजिता ।

(ii) मेलनं कुरुत । (विशेषण - विशेष्य - अन्वितिः) १

| 'अ' | 'ब' |
|---|---|
| १) सुवर्णयुगम् | प्राप्तम् । |
| २) सुवर्णपदकम् | लोकप्रिया । |
| ३) विश्वविक्रमः | अवतरितम् । |
| ४) क्रीडा | प्रस्थापितः । |

(iii) गद्यांशात् चित्वा द्वे धातुसाधित - अव्यये लिखत । १

स्वातन्त्र्यपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं प्रथमप्रयासः कृतः महाराष्ट्रेणैव । शून्यपञ्चनवैकतमे - (१९५०) ख्रिस्ताब्दे अखिल-भारतीय-कबड्डी-सङ्घटनायाः स्थापना समजायत । भारतीय ऑलिम्पिक-क्रीडासमित्या अष्टपञ्चनवैक (१९५८) तमे ख्रिस्तवर्षे एषः क्रीडाप्रकारः ऑलिम्पिक वैश्विक - क्रीडास्पर्धासु निवेशितः । शून्यनवनवैक (१९९०) तमे संवत्सरे बीजिङ्गनगरे आयोजितायाम् ऑलिम्पिक-स्पर्धायां चीनदेशेनापि एषा क्रीडा स्वीकृता । तदनन्तरं कबड्डीक्रीडायाः सुवर्णयुगमेवावतरितम् । बीजिङ्गनगरे समायोजितायाम् ऑलिम्पिकस्पर्धायां भारतदेशेन सुवर्णपदकं विजितम्, कबड्डीक्रीडायामेव । अनेन सुवर्णपदकेन आशियाई - स्पर्धायाः कबड्डीक्रीडायां सातत्येन त्रिवारं सुवर्णपदकं प्राप्य विश्वविक्रमः प्रस्थापितो भारतदेशेन । अधुना भारतदेशे तथैव जपान-पाकिस्तानादिषु आशियादेशेषु एषा क्रीडा क्रीड्यते, एवमेषा लोकप्रियापि सञ्जाता ।

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) कबड्डीक्रीडाप्रकारः ऑलिम्पिक-वैश्विक-क्रीडास्पर्धासु निवेशितः ।

(ii) चीनदेशेनापि एषा क्रीडा स्वीकृता ।

(iii) भारतदेशेन विश्वविक्रमः प्रस्थापितः ।

(iv) अखिल-भारतीय-कबड्डी-सङ्घटनायाः स्थापना समजायत ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

पारीनगर्याः खलु कण्ठभागे मालेव सीनाख्यनदी सुलग्ना ।
महासुखं यत्र जना लभन्ते नौकाविहारस्य तटभ्रमैश्च ।।१।।
ततस्तटे सीनसरित्समीपे गॉथीक-स्थापत्यकलात्मरूपम् ।
न्यायस्य प्रासाद इति प्रसिद्धमैतिह्यमुक्तं भवनञ्च दृष्टम् ।।२।।
समीपमाराधनमन्दिरं च सेन्ट्-चेपलं विश्रुतमस्ति नाम ।
मूर्ध्नोऽस्य तीक्ष्णस्तनुरग्रभागो नभस्थितं दर्शयतीव देवम् ।।३।।
विख्यातनाम्नी खलु जोनदेवी सुमार्गमध्येऽस्ति तदीयमूर्तिः ।
अश्वाधिरूढा स्वकरे गृहीत्वा ध्वजं समुत्तोल्य विराजते सा ।।४।।

**१. पृथक्करणम् ।** २

पॅरिससनगरम्

- नदी — [ ]
- न्यायमन्दिरम् — [ ]
- आराधनमन्दिरम् — [ ]
- मूर्तिः — [ ]

**२. शब्दज्ञानम् ।**

चतुर्थपदं लिखत । १

(i) गगनम् : नभः :: विख्यातम् : ...........।

(ii) प्रासादः : भवनम् :: शिरः : ...........।

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ।।१।।
यत्रोत्साहसमारम्भो यत्रालस्यविहीनता ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ।।२।।
साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ।।३।।

**१. अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

कयोः संयोगेन श्रीः अचला ध्रुवम् ?

**२. तात्पर्यलेखनम् ।** २

प्रथमश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) अतिथिर्बालकः....... स्वशक्तितः ।।

(ii) अत्यम्बुपानान्न ....... पिबेदभूरि ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) निशान्ते च पिबेद्वारि | शीलमेतत्प्रशस्यते । |
| (ii) अनुग्रहश्च दानं च | हेलया न कदाचन । |
| (iii) रसायनमिव प्राज्ञैः | स्रजं करकमेव च । |
| (iv) उपवीतमलङ्कारं | त्रिभी रोगो न जायते । |
| | वासरान्ते पिबेत् पयः । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | सप्तमी बहुवचन | प्रथमा एकवचन | पञ्चमी एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(धनुर्धारी, तस्याः, वाक्षु, इयम्, संस्कृतेः, अस्मासु)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(भोक्ष्यते, रचयताम्, चक्रे, तन्वीत, गृह्णाति, आप्नोत्)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत ।**

| | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| (i) | शान्तिः च सुखं च तयोः । | उपपद तत्पुरुष समास |
| (ii) | न विद्यते असूया यस्मिन् सः । | कर्मधारय समास |
| (iii) | समयं जानाति इति । | षष्ठी तत्पुरुष समास |
| (iv) | चन्द्रस्य ज्योत्स्ना । | अव्ययीभाव समास |
| (v) | रोम नाम नगरम् । | नञ् बहुव्रीहि समास |
| (vi) | समयम् अनतिक्रम्य । | इतरेतर द्वन्द्व समास |
| | | द्विगु समास |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) एष क्रीडाप्रकारः ............. कृतेऽपि प्रचलितोऽस्ति । ( महिलानां / महिलासु / महिला )

(ii) आर्यचाणक्यः .............. दूरं एकस्मिन् उटजे न्यवसत् । ( नगरम् / नगरस्य / नगरात् )

(iii) मधुरा माता च ................ गच्छतः । ( आपणं / आपणे / आपणात् )

(iv) ................ समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? ( तव / युष्मद् / त्वं )

(v) अलं ............... । ( चिन्ता / चिन्तां / चिन्तया )

(vi) सैनिकाः देशं ................ रक्षन्ति । ( शत्रुभिः / शत्रुभ्यः / शत्रूणाम् )

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | | | | | |
|---|---|---|---|---|---|
| (i) | अन्यैर्न | = | ...... | + | न । |
| (ii) | भूत्वैव | = | भूत्वा | + | ..... । |
| (iii) | ....... | = | तस्मात् | + | नरः । |
| (iv) | कृतेऽपि | = | ........ | + | अपि । |
| (v) | ....... | = | अपि | + | अद्य । |
| (vi) | दर्शयतीव | = | दर्शयति | + | ...... । |

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) बिल्वदले .............. पत्राणि सन्ति । (3)

(ii) संवत्सरे .............. अयने स्तः । (2)

(iii) श्रावणमासे ............. तिथौ कृष्णजन्म भवति । (8th)

(iv) शाकुन्तलस्य ............. अङ्कः अतीव सुन्दरः अस्ति । (4th)

(v) सप्ताहस्य ............. अहं मन्दिरं गच्छामि । (thrice)

(vi) मम मातामही दिनस्य ............. औषधं सेवते । (twice)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| ग्रन्थपालः | कार्यालये | नृत्यति । |
| नर्तकः | शालायां | कार्यं करोति । |
| अध्यापकः | ग्रन्थालये | पुस्तकानि रचयति । |
| कर्मचारी | रङ्गमञ्चे | पाठयति । |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

वर्षाकाले कज्जलवर्णैः मेघैः वारंवारं व्याप्तं भवति गगनम् । ग्रीष्मे तप्ता वसुधा ........ शाम्यति । महता वेगेन प्रवहन्ति नद्यो नदाश्च । वर्षासमये जलवर्षणे सञ्जीवितानि सस्यानि ...... । सर्वा भूमिः सस्यशामला सञ्जायते । वर्षाकालः खलु न केवलं कृषीवलानाम् अपि तु सर्वस्य जगतः जीवितम् । ........ विना न कदापि सस्यं तिष्ठेत् । लोकोऽपि नैव तिष्ठेत् सस्यं विना । यद्यपि वसन्तः ........ इति प्रख्यातः, तथापि वर्षाकाले स्थिताः सकलस्य भुवनस्य प्राणाः ।

( प्ररोहन्ति, ऋतुराजः, सलिलेन, जलधाराभिः )

**Best of Luck**